श्वासोपद्रवयुक्ताः । भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं त्रिदोषलिङ्गप्रादुर्भावः कासश्वासौ वा यत्रेति । भवन्ति चात्र । वसां मेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत् । आगन्तुस्तु व्रणः सिध्येन्न सिध्येद्दोषसम्भवः । स मर्म्मोपहिते देशे सिरास्न्वस्थिविवर्जिते । विकारो योऽनुपर्य्येति तदसाध्यस्य लक्षणम् । क्रमेणोपचयं प्राप्य धातूननुगतः शनैः । न शक्यउन्मूलयितुं वृद्धो वृक्ष इवामयः । स स्थिरत्वान्महत्त्वाच्च धात्वनुक्रमणेन च । निहन्त्यौषधवीर्य्याणि मन्त्रान् दुष्टग्रहो यथा । अतो यो विपरीतः स्यात्सुखसाध्यः स उच्यते । अबद्धमूलः क्षुपको यद्वदुत्पाटने सुखः । त्रिभिर्दोषैरनाक्रान्तः श्यावौष्ठः पिडकीसमः । अवेदनो निरास्रावो व्रणः शुद्ध इहोच्यते । कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः । स्थिराश्चिपिटिकावन्तो रोहन्तीति तमादिशेत् । रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम् । त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्द्दिशेत् । दोषप्रकोपाद्व्यायामादभिघातादजीर्णतः । हर्षात् क्रोधाद्भयाद्वापि व्रणो रूढोऽपि दीर्य्यति” ।

**कृत्यादूषणी** स्त्री कृत्या दूष्यतेऽनया दूषि–ल्युट् ङीप् । १ओषधिभेदे । “अयो बलासनाशनाः कृत्यादूषणीश्च यास्ता इहायान्त्वोषधीः” अथ०८,७,१०, “अनयाऽहमोषध्या सर्वाः कृत्या अदूदुषम्” १०,१,४, । आङ्गिरसे २जङ्गिडे ऋषिभेदे पु० । “अङ्गिरा असि जङ्गिड ! रक्षितासि जङ्गिड !” इत्युपक्रमे “अक्षकृत्यास्त्रिपञ्चाशीः शतं कृत्याकृतश्च ये । सर्वान् विनष्टतेजसोऽरसां जङ्गिडस्करत्” इत्याद्युक्त्वा “कृत्यादूषण एवायमतो अरातिदूषणः” इत्युक्तम् । अथ० १८,३४,१,

**कृत्यादूषि** पु० कृत्यां परकृताभिचारजां दूषयति दूषि–इन् । कृत्यानाशके जङ्गिडे मणिभेदे । “अरण्यादन्य आभृतः कृत्या अन्योरसेभ्यः । कृत्यादूषिरयं मणिरथो अरातिदूषिः” अथ० २,४,५,६,

**कृत्रिम** न० कृ–क्त्रि त्वे मप् च । १विड्लवणे, मेदि० २काचलवणे, ३तुरुष्कनामगन्धद्रव्ये, ४रसाञ्जने च राजनि० । ५सिह्लके पु० मेदि० ७क्रियया निष्पन्नमात्रे त्रि० । “सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः” “चित्रंसया कृत्रिमपत्रिपङ्क्तेः कपोतपालीषु निकेतनानाम् । मार्ज्जारमप्यायतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने” माघ: । “अकृत्रिमाकृत्रिमयोः कृत्रिमे कार्य्यसंप्रत्ययः” व्या०प० । द्वादशपुत्रमध्ये स्वयंकृते “सदृशं तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् । पुत्रं पुत्रगुणोपेतं स विज्ञेयश्च कृत्रिमः” इति मनूक्ते पुत्रभेदे पु० । सदृशं स्वजातीयं “सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः” उपसंहारात् । “कृत्रिमः स्यात् स्वयं कृतः” या०” । “कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिलोभनेनैव पुत्रीकृतः मातापितृविहीनस्तत्सद्भावे तत्परतन्त्रत्वात्” मिता० । कलौ तु “दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः” इति आदित्यपु० दत्तौरसभिन्नानां पुत्रताकरणनिषेधात् न तस्य कर्त्तव्यता एवञ्च “औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च” कलिधर्म्मप्रतिपादकपराशरवचने क्षेत्रजपदस्य औरसविशेषणत्वं कृत्रिमपदस्य च दत्तकविशेषणत्वं कल्पनीयमिति दत्तचन्द्रिका गौडदेशीयानां तथाचारश्च । पराशरवचनस्थकृत्रिमपदं न यौगिकं किन्तु पारिभाषिकस्वयंकृतविषयमेव अन्यथा दत्तकस्य कृत्रिमत्वविशेषणं व्यर्थं स्यात् अतः आदित्यपुराणवचनस्थदत्तपदस्य कृत्रिमोपलक्षणपरता युक्तेति कलौ कृत्रिमपुत्रस्यापि ग्राह्यतेति दत्तकमीमांसादयः । पाश्चात्यादिवङ्गदेशेष्वस्य प्रचारः । अनयोर्युक्तत्वायुक्तत्वसद्भावेऽपि आचारस्य बलवत्त्वाद्व्यवस्था । अयञ्च “औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च दायादाबान्धवाश्च षट्” मनुना बन्धुदायहरत्वेनोक्तः । स्वार्थे क । तत्रार्थे । सिह्लके पु० जटाधरः, । तुरुष्कनामगन्धद्रव्ये राजनि० ।

**कृत्रिमधूप** पु० कर्म्म० । नानासुगन्धिद्रव्यसंयोगजाते दशाङ्गषोडशाङ्गादौ धूपे अमरः ।

**कृत्रिमपुत्र** पु० कर्म्म० । १कृत्रिमे पुत्रभेदे । कृत्रिमसुतादयोऽप्यत्र । स्वार्थे क । तत्रार्थे वस्त्रादिरचितपुत्तलिकायाञ्च । “सा कन्दुकैः कृत्रिमपुत्रकैश्च” कुमा०

**कृत्वन्** त्रि० कृ–क्वनिप् तुक् च । कर्त्तरि । “तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने” ऋ०८,२५,२४, स्त्रियां ङीप् रश्चान्तादेशः । “महासिवेश्मः सहकृत्वरी बहुम्–यशःपटं तद्भटचातुरीतुरी” नैष० ।

**कृत्वा** अव्य०कृ–कृतौ हिंसायां वा क्त्वा । १विधायेत्यर्थे “कृत्वाचकार्थे रुचिसंवक्त्र,मम्” भट्टिः । २हिंसित्वेत्यर्थे च ।

**कृत्वी** स्त्री व्यासपुत्रशुकदेवस्य १कन्यायाम् । “पराशरकुलोद्भूतः शुकोनाम महातपाः । भविष्यति युगे तस्मिन् (द्वापरे) महायोगी द्विजर्षभः । व्यासादरण्यां सम्भूतो